CC-0. In Public Domain. Digitization by eGangotri

६।

श्रीं ओं

श्रीः

भागीरथी ।

(द्वैताद्वैतप्रतिपादकद्विविधप्रणवार्थप्रकाशिनी)

मिथिलामण्डलान्तर्गतकौलघ्राम-
वास्तव्येन दिग्विजयिना श्रोषा-
ख्यपण्डितपञ्चाननेन

श्रीलूटनशर्मणा विरचिता ।

काश्यां 'गोकुलप्रेस'-
नाम्नि यन्त्रालये
मुद्रिता ।

प्रथमावृत्तिः] सन् १९२५ [ ]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तान्त्रिकः (द्वैते) वैदिकः (अद्वैते)

ॐ ओम्

(सप्ततत्त्वात्मकः) (चतुस्तत्त्वात्मकः)

[एतद्भिन्नः प्रणवो निर्मूलः]

शुद्धयशुद्धिपत्रम्—

अशुद्धिः	शुद्धिः	पृष्ठाङ्कः	पंक्तिः
ममास्तीदं	ममास्तीह	१	१४
उत्फुल्लोल	उत्कल्लोल	७	१०
नीरनीरज	नीलनीरज	”	११
भू वैष्णवी	भूर्वैष्णवी	”	२०
—शक्ते	चैतन्यशक्ते	१०	४
किन्तु	किन्तु चैतन्य	”	६
क्रँ	क्रें	”	२०
क्रौँ	क्रौं	”	”
ऽहर्नि	ऽहर्नि	११	१७
तन्न	तत्र	१२	१५
स्त्रियः स्व	स्त्रियश्च	”	१६
नादातीत	नादार्तीता	१८	७
इजे	ईजे	”	४
धार्मिके च	धार्मिकानां	”	१४
तस्यै	तस्य	२०	३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ।

अथ भागीरथी ।

प्रणम्य सच्चिदानन्दरूपिणीं जगदीश्वरीम् ।
विष्णुब्रह्मशिवाराध्यामादिविद्यां सनातनीम् ॥
व्याख्याम्भागीरथीनाम्नीम्प्रणवार्थप्रकाशिनीम्।
कैलषग्रामवास्तव्य—श्रीछोटकनिशर्म्मणः ॥
आत्मजस्तत्पदध्याता जयभद्रानुसम्भवः ।
मातुस्सुवस्तुदेव्यास्तु शून्यस्थानगतम्पदम् ॥
ध्यात्वा प्रणम्य च मुहुरद्वैतेनैव वर्त्मना ।
लूटनः कुरुते यस्य श्यामादत्तस्सुतःस्मृतः ॥
यथा भागीरथी धर्मपत्नी प्राणाधिदेवता ।
व्याख्या भाति तथैवैषा तस्माद्भागीरथी स्मृता॥
कोऽहं कस्मात्समायातः क्व च गन्तास्म्यहम्पुनः।
किं कर्त्तव्यं ममास्तीदं प्रश्नानेतानवाप्य च ॥
अधीत्य संस्कृतं शास्त्रं निगमागमसम्भवम् ।
यदुत्तरं मया ज्ञातं ग्रन्थे चास्मिन्विलिख्यते ॥
आहारनिद्राभयमैथुनाद्यं समानमेतत् पशुभिर्नराणाम् ॥
ज्ञानं नराणामधिको विशेषस्स तेन हीनः पशुभिस्समानः।

इत्युत्तरगीताश्लोकेन ज्ञानवत्त्वं मनुष्यत्वमिति मनुष्यलक्षणम् । ज्ञानहीनत्वम्पशुत्वमिति पशुलक्षणञ्च विज्ञातम्भवति । तच्च ज्ञानं ब्रह्मण एव नान्येषामाहारादीनाम्प-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दार्थानाम्, तेषाम्पशावपि सत्त्वात्, अत एवात्रिकृतधर्म-शास्त्रे-"देवो मुनिर्द्विजो राजा वैश्यश्शूद्रो निषादकः । पशुर्म्लेच्छोऽपि चाण्डालो विप्रा दशविधाः स्मृताः ॥ इति दशविधब्राह्मणेषु 'ब्रह्मतत्वं न जानाति ब्रह्मसूत्रेण गर्वितः । तेनैव स च पापेन विप्रः पशुरुदाहृतः' इति ब्रह्मज्ञानहीने ब्राह्मणे पशुत्वमेवोक्तम् । वशिष्ठकृतधर्मशास्त्रेऽपि यथा— 'चतुर्वेदोऽपि यो विप्रस्सूक्ष्मब्रह्म न विन्दति । तावद्भ्रमति संसारे यावद् ब्रह्म न विन्दति ॥ वेदभारभराक्रान्तस्स वै ब्राह्मणगर्दभः' इति ब्रह्मज्ञानहीने ब्राह्मणे गर्दभत्वमेवोक्तम्। तथा च ब्रह्मज्ञानहीनत्वम्पशुत्वमिति पशुलक्षणं निर्णीतं भवति। एवञ्च पशुत्वमोचनपूर्वकमनुष्यत्वलब्धये ब्रह्मज्ञान-मावश्यकमिति। किन्तद्ब्रह्मेति जिज्ञासा समुत्पन्ना, अथैत-स्मिन्नवसरे "ओम् इत्येकाक्षरम्ब्रह्म व्याहरन् मामनुस्मर-न्निति भगवद्वाक्येन प्रणवे ब्रह्मवाचकत्वमवगम्यते यतः प्रणवपर्य्यायाश्शब्दास्तावल्लिख्यन्ते यथा बीजवर्णाभि-धाने-"ओंकारः प्रणवस्तारो वामश्च हंसकारणम्। त्रैगुण्य-त्रिगुणो ब्रह्म सत्यो मन्त्रादिरव्ययः ॥ ब्रह्मबीजं त्रितत्त्वञ्च पञ्चरश्मिस्त्रिदैवतः" इति । तन्त्रे यथा-'ओंकारो वर्त्तुल-स्तारो वेदादिः प्रणवो ध्रुवः । सर्वजीवोत्पादकश्च पञ्च-देवोऽध्रुवस्त्रिकः' इति । न चैकत्र त्रिदैवतः, त्रितत्त्वम्, त्रिगुणः, त्रैगुण्यमित्युक्तम्, अपरत्र पञ्चदेवः पञ्चरश्मि-रिति विरोधो वाच्यः, त्रीणि दैवतान्यस्मिन्, त्रीणि त-त्त्वान्यस्मिन्, त्रयो गुणा अस्मिन्निति बहुव्रीहिसमासस्या-श्रयणात्, त्रैगुण्यमित्यत्रापि त्रयाणां गुणानां समाहार-स्त्रिगुणम् । तेन ज्ञायते 'कर्म्मणि ष्यञ्' गुणत्रयसमूह-गम्य इत्यर्थः । एवमेकत्र ध्रुवः अपरत्राध्रुव इत्यपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विरोधो न वाच्यः, पञ्चसु देवेषु त्रयो देवा गुणपदवाच्या अथवा लयवन्तः, द्वौ शक्तिशिवात्मकौ देवौ ध्रुवौ लयशून्यावित्यर्थः। एवञ्च पञ्चदेवशब्देन गुणत्रयविशिष्टशक्तिशिवज्ञानं कर्त्तव्यमिति सिद्धम्, प्रणवे पञ्च देवाः सन्तीति च फलितम्। अत एव पञ्चरश्मिरित्यपि नाम सार्थकम्। अत्र पञ्चसु देवेषु प्रथमो बिन्दुरेव, द्वितीयश्शक्तिपदवाच्यो यथा क्रियायोगसारे—'बिन्दुश्शिवात्मकस्तत्र बीज शक्त्यात्मकं स्मृतम्। तयोर्योगाद्भवेन्नादस्ततो जातास्त्रिशक्तयः॥' अत्र योगादित्यस्याद्वैतादित्यर्थः। नाद इत्यस्य शक्तिरित्यर्थस्तथा च शिवशक्त्योरद्वैताच्छक्तिः प्रादुर्भूता, ततश्च शक्तेः शक्तित्रयसमष्टिरोकारात्तरः प्रादुर्भवतीति पञ्चदेवत्वं सिद्धम्। एवञ्च शक्तिविशिष्टत्वेनैव ब्रह्मणि द्वैतत्वमिति क्रियायोगसारमतं स्पष्टम्, परन्तु जीवात्मपरमात्मभेदेनैव ब्रह्मणि द्वैतत्वमिति नैयायिकादयस्तत्तत्त्वात्मकत्वञ्च प्रणवे प्रस्तुवन्ति यथा शारदातिलके—

'निर्गुणस्सगुणश्चेति शिवो ज्ञेयस्सनातनः।
निर्गुणः प्रकृतेरन्यस्सगुणस्सकलः स्मृतः॥
सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुरजायत॥
परशक्तिमयस्साक्षात्त्रिधाऽसौ भिद्यते पुनः।
बिन्दुर्नादो बीजमिति तस्य भेदाः प्रकीर्त्तिताः॥'

अत्र निर्गुणपदेन बिन्दुतीतनामा परमात्मा शून्यस्थानगतो वो यो, तच्च शून्यस्थानं सत्यलोकादुपरि चरमसूक्ष्माकाशस्वरूपम्भावनीयम्। सोऽयम्परमात्मा सूक्ष्मातिसूक्ष्मो निरवयवो ज्ञानगम्यश्चोच्यते अयमेक एव सर्वगतो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विज्ञातव्यो भवति यथैकः सूर्य्यो जलपूर्णघटसहस्रेषु प्रतिविम्बितो नानात्वं न भजते। अस्माद्विन्दोस्सगुणो जीवात्मपदवाच्यो भवति सच्चिदानन्दविभवपदवाच्योऽप्ययमेव, सोऽयं जीवात्मा विन्दुशब्देन सकलशब्देनाप्युच्यते, एतस्माद्विन्दोर्निर्गुणा शक्तिः प्रादुर्भवति। सैव मूलप्रकृतिशब्देन प्रसिद्धा ततश्चक्तेस्सगुणा शक्तिः प्रादुर्भवति या नादशब्देनार्धमात्राशब्देन महत्तत्त्वशब्देन बुद्धिशब्देन चोच्यते। सगुणशक्तेर्विन्दुः प्रादुर्भवति तत्र विन्दुपदेनौकाराक्षरः प्रतीयते, त्रिधा रूपेण भिद्यत इत्युक्तेः। एवञ्च 'अआउ' इति त्रयो भेदा बोध्या भवन्ति। यथा निर्वाणतन्त्रे प्रथमोल्लासे पार्वतीम्प्रति शिववाक्यम्—

"अतीतं यच्च ते रूपं शून्यस्थाने प्रतिष्ठितम्।
सूक्ष्मात् सूक्ष्मतमं ज्ञेयम्परमात्मेति संज्ञितम्॥
ज्ञानगम्यञ्च तत् प्रोक्तम्प्रकृत्या रहितम्प्रिये।
प्रकृत्या संयुतं देवि! सत्यलोके व्यवस्थितम्॥
विन्दुसंज्ञञ्च तद्रूपं सूक्ष्मन्तच्चन्द्रमण्डलम्।
जीवात्मा कथ्यते देवि! जाह्नवी सैव गीयते॥
तस्माद्विन्दोस्समुद्भूता निर्गुणा त्वं व्यवस्थिता।
शक्तिस्सा कथ्यते देवि नित्यानन्दस्वरूपिणी॥
तस्याश्शक्तेस्समुद्भूता सगुणा शक्तिरुत्तमा।
नादरूपा चार्द्धमात्रा त्वमेव परिगीयसे॥
तेजस्स्वरूपा देवेशि! दाहिका शक्तिरीरिता।
अकाराक्षररूपा च शुद्धस्फटिकसन्निभा॥
अनन्तसूर्य्यरूपा सा महत्तत्त्वम्प्रकीर्त्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आदित्यमण्डलन्तत्र चन्द्रकोटिर्व्यवस्थिता ॥
तपोलोके च तद्रूपन्तस्मादोकारसम्भवः ।
अहङ्कार इति ख्यातस्त्रिधात्मानं व्यवस्थितः ॥
भिद्यतेऽसौ यदा देवि अआउ इति रूपधृक् ।
सत्त्वं रजस्तम इति यजूऋक्सामसंज्ञितः ॥
यजुस्सत्त्वं समाख्यातं सूर्य्यमण्डलमुच्यते ।
क्रियाशक्तिश्च तद्रूपम्भुवर्लोके व्यवस्थितम् ॥
गगनञ्च तदेवोक्तं सूर्य्यरूपं मनोहरम् ।
ऋग्रजश्च समाख्यातं चन्द्रमण्डलमुत्तमम् ॥
इच्छाशक्तिश्च तद्रूपं वायुरूपम्प्रकीर्त्तितम् ।
नाभिदेशे स्थितन्तच्च ब्रह्मासौ विनिगद्यते ॥
तमस्साम समाख्यातं वह्निमण्डलमुत्तमम् ।
ज्ञानशक्तिश्च तद्रूपम्पृथिव्यां सम्प्रतिष्ठितम् ॥
तत्त्रिकोणमिति ख्यातं योनिस्सा प्रोच्यतेऽपरा ।
इदमोङ्काररूपं हि यो जानाति च साधकः ॥
स त्वद्रूपं विजानाति स ब्राह्मण इतीरितः ।
द्वैतवादो मया प्रोक्तो गुप्तो देवालये च यः ॥
सृष्टिकामोऽभ्यसेद् देवि द्वैतम्ब्रह्म सनातनम् ।"

"कामधेनुतन्त्रेऽपि—'ओंकारम्परमाश्चर्य्यं विष्णुब्रह्मशिवात्मकम् । जीवतत्त्वात्मकं ज्ञेयं जगत्त्रयमयं शृणु' इत्युक्तम् । 'अकारो वासुदेवः स्यादाकारश्च पितामहः उकार उच्यते शम्भु'-रित्येकाक्षरकेऽपि । एवमेव ज्ञानतत्त्वप्रदीपे शिवप्रणीते यथा—'शून्ये सूक्ष्मातिसूक्ष्मः प्रकृतिविरहितो बिन्दुतीतः पराख्यो जीवाख्यश्चापि नित्यः प्रकृतिपरिगतो बिन्दुसिन्धुस्स आत्मा । नां-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दातोतातिसूक्ष्माऽजनि प्रकृतिरतश्चार्द्धमात्रा ततोऽभूज्जा-
ताहंकारसृष्टिस्त्रितयगुणमितौंकार ॐकार एषः ॥
इति प्रणवे सर्वथा तत्त्वसप्तकं सिद्धम्, अत एव
पञ्चशून्ये स्थिता तारा सर्वान्ते कालिका स्मृतेति मेधासा-
म्राज्योक्तिरपि संगता। तत्र प्रथमतत्त्वस्य नामानि यथा-
विन्दुतीतः, परमात्मा, निरवयवः, सूक्ष्मातिसूक्ष्मः,
निर्लिप्तः, ज्ञानगम्यः, तुरीयः, सनातनः, प्रकृतिरहितः,
निर्गुण इत्यादि। अस्य निराकारत्वेन निर्गुणत्वेन निरव-
यवत्वेन निर्लिप्तत्वेन नित्यशुद्धबुद्धमुक्तस्वभावत्वेन च
सुखदुःखादिज्ञानवत्त्वेन सम्भवतीति विज्ञैर्बोद्धव्यम्भवति।
द्वितीयतत्त्वस्य नामानि यथा—विन्दुः, जीवात्मा, सूक्ष्म-
चन्द्रमण्डलम्, गङ्गा, सगुणः, सकलः, अमृतम्, हिरण्य-
गर्भः, ईश्वरः, विराट्, जीवब्रह्म इत्यादिष्टैतप्रतिपादक-
ग्रन्थोक्तानि। पुरुषः, सिद्धः, आदिविद्वानिति कपिलो
वक्ति, पुरुषविशेष इति पातञ्जला निगदन्ति, शुद्धबुद्ध-
स्वभाव इत्यौपनिषदा भाषन्ते, निर्लिप्तः स्वतन्त्र इति महा-
पाशुपता रटन्ति, यज्ञपुरुष इति याज्ञिका लपन्ति, सर्वज्ञ
इति सौगता आस्फोटयन्ति, निरावरण इति दिगम्बरा
रुवन्ति, उपास्यत्वेन देशित इति मीमांसका जपन्ति,
लोकव्यवहारसिद्ध इति चार्वाका उद्घोषन्ते, यावदुक्तोपपन्नः
कर्त्तेति नैयायिकाश्शंसन्ति, विश्वकर्मेति शिल्पिनो जल्प-
न्ति, इति न्यायकुसुमाञ्जलिग्रन्थे।'हिरण्यगर्भस्समवर्त्तताग्रे
भूतस्य जातः पतिरेक आसी-'दिति यजुर्वेदेऽपि। तत्रामृ-
तमिति जलस्य संज्ञा वर्त्तते 'पयः कीलालममृतं जी-
वनम्भुवनं वन'-मित्यमरः। विन्दुर्ब्रह्मलक्षणैवेत्यपि तत्रै-
वोक्तम्। तथा च तेजस्स्वरूपशक्तिविशिष्टममृतं जीवब्रह्मे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ति विज्ञायते, अत एव 'अप एव ससर्ज्जादौ तासु बीजमवा-सृज'-इति मनुवचनं संगच्छते। या सृष्टिस्रष्टुराद्येति कालिदासोक्तिरपि संगता। अत एव प्रसन्नराघवनाटके सिद्धपुरुषेण जयदेवापरनामकेन पक्षधरमिश्रेण कृते चन्द्रमण्डलवर्णनप्रसरे भगवतो रामचन्द्रस्य स्वगतविचा-रोक्तिर्य्यथा—'इन्दुरिन्दुरिति किं दुराशया विन्दुरेष पयसो विलोक्यते। नन्विदं विजयते मृगीदृशश्श्यामकोमलकपो-लमाननम्॥' अपि च सीताम्प्रति यथा—'तन्वि! त्वद्वदन-स्य विभ्रमलवं लावण्यवारां निधेरिन्दुस्सुन्दरि दुग्धसिन्धु-लहरीविन्दुः कथं विन्दतु। उत्फुल्लोलविलोचनेक्षणमयं शीतांशुरालम्बतामुत्फुल्लनवनीरजवनीखेलन्मरालश्रियं'-मित्युक्तन्तदपि संगच्छते। अन्यथा महतश्चन्द्रमण्डलस्य विन्दुरूपत्वं कथम्भवितुमर्हतीति विज्ञायते चैतत्, अस्य महतश्चन्द्रमण्डलस्य समवायिकारणम्विन्दुरेवेति यथा वट-बीजवर्द्धितं वृहद्रूपम्भजते,तथैव विन्दुरेव वर्द्धितो वृहच्चन्द्र-मण्डलरूपम्भजते, अर्द्धमात्राशक्तिरेव सूक्ष्मसूर्य्यमण्डलं ललाटस्थन्तदेव हृदयस्थितं वर्द्धितम्वृहत्सूर्य्यमण्डल-म्भवतीति विज्ञायते, हिरण्यगर्भशब्दे हिरण्यपदेनाग्निः प्रतीयते, कार्य्यसमवायिकारणयोरभेदात्, तथा हि वृह-स्पतिः—'अग्नेरपत्यम्प्रथमं सुवर्णं भू वैष्णवी सूर्यसुताश्च गावः। लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गाञ्च महीञ्च दद्या-'दिति सुवर्णस्य यथा तेजस्यन्तर्भावस्तथाग्रे वक्ष्यतीति न्यायसिद्धान्तमुक्तावल्याम्। ततश्च सूक्ष्मा-तिसूक्ष्मतेजश्शक्तिविशिष्टजलविन्दुरेव जीवात्मेत्यवगम्यते स चानन्तशरीरगतोऽनन्तरूपो भवतीति विज्ञातव्यम्। अथ तृतीयतत्त्वस्य नामानि यथा—नादातीता, निर्गुण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्तिः, निरवयवा, नित्यानन्दा, अतिसूक्ष्मा, मूलप्रकृतिः सत्त्वरजस्तमसां साम्यावस्था, अजाप्रधानम्। चतुर्थतत्त्वस्य नामानि यथा—नादः, अर्द्धमात्रा, सगुणशक्तिः, महत्तत्त्वम्, अक्षरासुधा, त्रिधा मात्रात्मिका, नित्या, अकारः। यथा कामधेनुतन्त्रे—अर्द्धमात्रा शक्तिरूपा ध्यानमस्याश्च कथ्यते। अकारम्परमाश्चर्य्यं शङ्खज्योतिर्म्मयम्प्रिये। विष्णुब्रह्ममयं वर्णं तथा रुद्रमयं प्रिये। पञ्चप्राणमयं वर्णं स्वयम्परमकुण्डलीत्युक्तम्। अक्षराणामकारोऽस्मीति भगवद्गीतायाम्। अकारो वासुदेवः स्यादिति कोषेऽपि। यतश्चार्द्धमात्राकृष्णयोरभेदः पर्य्यवसितः अस्यास्समष्टिसृष्टिरोकाराक्षरः प्रादुर्भवति यस्याहंकार इति नाम कथ्यते स च शक्तित्रयात्मकः। यथा कामधेनुतन्त्रे—ओकारम्परमाश्चर्य्यं विष्णुब्रह्मशिवात्मकम्। जीवतत्त्वात्मकं ज्ञेयं जगत्त्रयमयं श्रृणिवति। अत्र विष्णुपदेन पञ्चमो देवोऽकारो विज्ञायते, तस्य नामानि यथा—सत्त्वगुणः, आकाशः, सूर्य्यः, विष्णुः, यजुर्वेदः, अयम्भुवर्लोके हृदये ध्यातव्यः, षष्ठतत्त्वस्याकारस्य नामानि यथा—रजोगुणः इच्छाशक्तिः, वायुः, ब्रह्मा, ऋग्वेदः, अयं नाभिदेशे भावनीयः। सप्तमतत्त्वस्योकारस्य नामानि यथा—तमोगुणः, ज्ञानशक्तिः, अग्निः, रुद्रः, सामवेदः, अयम्भूमौ भावनीयः। इतीमे त्रयोऽहंकारपदवाच्याः, अहंकारात् सूक्ष्मपञ्चतन्मात्राण्युत्पद्यंते यथा—शब्दतन्मात्रा, स्पर्शतन्मात्रा, रूपतन्मात्रा, रसतन्मात्रा, गन्धतन्मात्रा। अहंकारादेवोभयमिन्द्रियञ्चोत्पद्यते। तत्र पञ्चज्ञानेन्द्रियाणि यथा—त्वग्जिह्वानासिकाकर्णनेत्राणि, पञ्चकर्म्मेन्द्रियाणि यथा—मुखहस्तपादगुदलिङ्गानि। सूक्ष्मपञ्चतन्मात्रेभ्यः स्थूलपञ्चत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्मात्राण्युत्पद्यन्ते यथा—आकाशतन्मात्रा, वायुतन्मात्रा, तेजस्तन्मात्रा, जलतन्मात्रा, पृथ्वीतन्मात्रा इति पञ्चविंशतितत्त्वप्रभवानि चतुर्दश भुवनानि सन्तीति पर्य्यवसितम्। एतदेव सांख्ये कपिलेन व्यलेखि यथा—सत्त्वरजस्तमसां साम्यावस्थाप्रकृतिः प्रकृतेर्म्महान् महतोऽहंकारोऽहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियन्तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति विंशतिर्गणः। अथ विन्दुर्जलतत्त्वम्, अर्द्धमात्रा पृथ्वीतत्त्वम्, अकार आकाशतत्त्वम्, आकारो वायुतत्त्वम्, उकारोऽग्नितत्त्वमिति पृथ्व्यप्तेजोवाय्वाकाशात्मको जीवस्तस्माद्भिन्नः परमात्माऽतीतपदवाच्यः परा शक्तिश्चातीतपदवाच्येति जीवात्मपरमात्मनोर्भेदः स्पष्ट इति न्यायसांख्ययोगवक्तारः। वस्तुतस्तु अकारश्च तथोकारो मकारश्चाक्षरत्रयम्। एतास्तिस्रः स्मृता मात्रास्सात्त्वरराजसतामसाः। अर्द्धमात्रा स्मृता चान्या योगिगम्या दुराशया। पिपीलिका गतिस्पर्शा प्रयुक्ता मूर्ध्नि लक्ष्यते॥ गान्धारीति च विख्याता गान्धारस्वरसंश्रये'-ति नानोपनिषद्वाक्येन मार्कण्डेयपुराणवाक्येन चार्द्धमात्राशक्तिरेवाद्वैतं ब्रह्मेति युक्तं विज्ञायते, यथा निर्वाणतन्त्रे प्रथमपटले-'मुक्तिकामोऽभ्यसेद्देवि अद्वैतं वेदचोदितम्। अकारश्च तथोकारो मकारश्चाक्षरत्रयम्। एतास्तिस्रः स्मृता मात्रास्सात्त्वरराजसतामसाः। अर्द्धमात्रा स्मृता चान्या त्वमेव परमेश्वरि। गान्धारीति च विख्याता गान्धारश्चरसंश्रिता। सूर्य्यकोटिश्चन्द्रकोटिस्तस्यामेव विराजते। नातः परतरं देवि तत्त्व रूपं निगद्यते॥ एतच्च तेजसो रूपमर्द्धमात्रात्मकं स्मृतम्। अकाराक्षररूपेण कीर्त्तितम्भुवनत्रये। महानात्मेति विख्यातं सूर्य्यरूपं निगद्यते। योनिरूपश्च-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत् प्रोक्तं धरा सैव तु गीयते ॥ गुणत्रयञ्च ते रूपं विष्णु-ब्रह्ममहेश्वरम्। क्रियेच्छाज्ञानसम्भूतं वर्द्धितम्भुवनत्रयम्। अर्द्धमात्रां विजानाति स च मुक्तो भवेद्ध्रुवमिति प्रणवे तत्त्वचतुष्टयमेवोपलब्धम्भवति। तथा च शक्तेरतिरिक्तौ कावपि जीवात्मपरमात्मपदवाच्यौ परमेश्वरौ न विद्येते किन्तु शक्तिरेवाद्वैतम्ब्रह्मेति सिद्धम्भवति, अत एत 'ओम्' इत्येकाक्षरम्ब्रह्मेति भगवद्वाक्यमपि संगतम्भवति, एका अद्वैतब्रह्मरूपा अक्षरा अर्द्धमात्रा शक्तिर्य्यत्रेति व्याख्यानात्, अन्यथा तत्त्वचतुष्टयात्मके अक्षरचतुष्टये एकाक्षरत्वकथनमसंगतमेव स्यात्, अत एव निर्वाणतन्त्रे कर्प्पूरबीजस्योद्धार एतादृश एवावलोक्यते यथा—ब्रह्माग्निभ्यां महालक्ष्मीरर्द्धेन्दुसुविभूषिता। एकाक्षरी महाविद्या कर्प्पूराख्या प्रकीर्त्तिता। तामाराधय राजेन्द्र ततो विप्रत्वमाप्स्यसीत्यत्र विन्दुर्नावलोक्यते, किन्तु गुणत्रयसहिता शक्तिरेव व्याख्यातेति कर्प्पूरबीजोद्धारेऽपि तत्त्वचतुष्टयमेवोपलभ्यते। अत एवाथर्वणवेदे सौभाग्यकाण्डे कालिकोपनिषदि—अथ हैनाम्ब्रह्मरन्ध्रे स्थिताम्ब्रह्मस्वरूपिणीमाप्नोति सुभगां कामरेफेन्दिरां समष्टिरूपिणीमादावित्यादि अत्र सुभगा अर्धमात्रा शक्तिः सोचार्द्धेन्दुस्वरूपा, कामः ककारस्स च रेफयुक्तस्तेन 'क्रीँ' इति महालक्ष्मीरीकारस्तेन क्रीँ इत्येव सिद्धम्भवति अत एव केनोपनिषद्यपि तृतीयखण्डे यथा—अथेन्द्रमब्रुवन् भगवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीन्तां होवाच किमेतद्यक्षमिति सा ब्रह्मेति होवाचेत्युक्तम्। अत एव त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति भगवद्वाक्यमपि संगतम्। तस्माद्धार्द्धमात्रायाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्तिः अर्द्धेन्दुः, नादः, अनुनासिकः, सूक्ष्मसूर्य्यमण्डलम्, महत्तत्त्वम्, पृथ्वी, महायोनिः, सुधा अक्षरा, नित्या, बुद्धिः, ख्यातिः, प्रज्ञा, स्मृतिः, धृतिः, परमेश्वर इत्यादिनामानि। यजुर्वेदेऽपि यथा—वेदाहमेतम्पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात्, तमेव विदित्वाति मृत्युमेति नान्यपन्था विद्यतेऽयनायेत्युक्तम्। अत्र महान्तमित्यस्य महत्तत्त्वम्, महान्तमात्मानमित्यर्थः, महानात्मेति शक्तेरेव संज्ञा यथा महाभारते अश्वमेधपर्वणि महानात्मामतिर्विष्णुर्जिष्णुश्शम्भुश्च वीर्य्यवान्। बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः॥ पर्य्यायवाचकैश्शब्दैर्म्महानात्मा विभाव्यते। तं ज्ञानन् ब्राह्मणो विद्वान् प्रमोहं नाविगच्छतीति। अथ सूर्योऽर्द्धमात्राशक्तिरेव तज्जातत्वादहमपि शक्तिरेवास्मीति विज्ञानं मोक्षसाधनमिति फलितम्। अत एव निर्वाणतन्त्रे चतुर्थपटले, महाभारते शांतिपर्वणि च यथा—

उच्छ्वासैरेव निश्वासैर्हंस इत्यक्षरद्वयम्।
जपतेऽहर्निशम्प्राणी सोऽहमित्येव जायते॥
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि।
जपतेऽहर्निशम्प्राणी सान्द्रानन्दमयीं शुभाम्॥
विना जपेन देवेशि जपो भवति मन्त्रिणः।
अजपेयं ततः ख्याता सन्ध्योपासनवर्जिते' त्युक्तम्। निर्वाण एव षोडशपटले ज्ञानयोगप्रकरणे पार्वतीम्प्रति शिववाक्यं यथा—

परमाणुमितं देवि तेजो यत् परमेश्वरि।
शून्यस्थानगतम्भद्रे महायोनिरिति स्मृतम्॥
तदेव च जगत् सर्वं चिन्तयेत् साधकोत्तमः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकमेव जगत् पश्येत स्वशरीरम्पुनः पुनः ॥
योनितो निर्गतं देहं योनिरूपं विचिन्तयेत्।
यथा स्वदेहसम्भूतैः सूत्रैर्निर्म्माय मन्दिरम् ॥
मध्ये स्थिता स्वयं लूता यावत् कालं यदृच्छया।
पुनस्तत्सूत्रजालं हि देहे संस्थाप्य तिष्ठति ॥
तथैव योनितो जातं जगत्तस्यां विशेदपि।
सूक्ष्मयोनेरुद्भवभूर्विष्णुर्ब्रह्मा शिवस्तथा ॥
तस्यामेव विलीनाश्च भवन्त्येव न संशयः।
तस्माद्विष्णुश्च ब्रह्मा च शिवश्चैव महेश्वरि ॥
शक्तेरेवोद्भतास्सर्वे शाक्तास्तस्मात् प्रकीर्त्तिताः।
तस्माच्छक्तिमयं सर्वं जगदेतद्विचिन्तयेत् ॥
यथान्यग्रोधबीजन्तु क्षितौ वस्तु द्रुमायते।
आदावेकस्ततोऽनेकस्स्वभावाच्छादनादिभिः॥
इदम्पत्रमियं शाखा फलञ्चेदं मनोहरम्।
तन्न बीजानि बीजेषु वृक्षाः सन्ति तथा प्रिये॥
सर्वमेकम्भवेद्देवि बीजरूपं हि सुन्दरि।
बीजञ्च शक्तिसञ्जातम्बीजे शक्तिः प्रतिष्ठिता ॥
यतश्शक्तिमयं देवि जगदेतच्चराचरम्।
स्त्रियः स्वशक्तयः ख्याता यतस्त्रिविधसर्गकम् ॥
अत एव महेशानि न स्त्रियं निन्दयेत् क्वचित्।
शुनीदेहे स्थितां योनिं कालीबुद्ध्या नमेत् सदा।
एवं यः प्रणमेद्देवि योनिं सर्वत्र सुन्दरि ॥
मातुर्गर्भं विशेन्नैव सत्यं सत्यं महेश्वरि" ।

इति शक्तेरेव सर्वस्मात् परत्वमुक्तम्, तत्रैव सप्तदश पटले पार्वतीम्प्रति शिववाक्यं यथा--

राजयोगञ्च विज्ञातुं भीमसेनः पुरा प्रिये।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जगाम चिन्तितस्तूर्णं युधिष्ठिरगृहम्प्रति ॥
युधिष्ठिरश्च विज्ञाय ज्ञानयोगप्रभावतः।
स्वदेहोपरि संस्थाप्य द्रौपदीम्प्राणवल्लभाम् ॥
पर्यंके चैव सुष्वाप स्वयं शवसमोऽभवत्।
भीमसेनस्तथापश्यद्विस्मयम्परमं ययौ ॥
शिक्षयिष्यति किं मां हि स्त्रीवशः कामकिंकरः।
महादेवं गमिष्यामि कैलासे ज्ञानसागरम् ॥
राजयोगं स भूतेश उपदेक्ष्यति मां ध्रुवम्।
विचार्य्यैवं भीमसेनो जगाम शिवमन्दिरम् ॥
शिवो ध्यानेन विज्ञाय भीमस्याज्ञानमद्भुतम्।
छेत्तुं सुष्वाप शयने व्याघ्रचर्मणि सत्वरम् ॥
वक्षःस्थलोपरि गतां विधाय पार्वतीम्प्रियाम्।
स्वयं शवसमो जातो भीमः पश्यतु तादृशम् ॥
भीमसेनोऽथ तं दृष्ट्वा शय्याभूतं शिवन्तथा।
ज्ञानं न लेभे मूढ़ात्मा निनिन्द च महेश्वरम् ॥
ततो गन्तुं मनश्चक्रे श्रीकृष्णं योगिसत्तमम्।
चिन्तयन् राजयोगन्तु श्रीकृष्णं शरणं गतः ॥
जाड्यन्तस्य शिवो ज्ञात्वा मायाञ्चक्रे मनोहराम्।
वटवृक्षसमीपस्थं ददर्श भवनोत्तमम् ॥
भवनाग्रे ददर्शाथ स्वर्णसिंहासनं वरम्।
सिंहासने द्रौपदीञ्च तदग्रे वीरपुंगवान् ॥
आज्ञाञ्चक्रेऽथ वीरेभ्यो भीमसेनस्य शोणितम्।
क्षिप्रमानय भो वीराः पास्यामि रुधिरम्बहु ॥
श्रुत्वा प्रदुद्रुवुर्वीरा भीमसेनस्य पृष्ठतः।
भीमसेनोऽपि दुद्राव भयार्त्तश्शरणं हरिम् ॥
जगाम यमुनातीरं श्रीकृष्णं जलसंस्थितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षोडशस्त्रीसहस्राणां वृन्देनावेष्टितं हरिम् ॥
रक्ष रक्षेति च मुहुर्भीमसेन उवाच ह ।
श्रुत्वा भयकृतं वाक्यं भीमसेनस्य सत्वरम् ॥
प्रोवाच भगवान् भीमं किन्ते भयमुपस्थितम् ।
गच्छ भीम यथायातं येनैव वर्त्मना द्रुतम् ॥
तेनैव वर्त्मना वीर भयम्पश्यामि नो तव ।
राजयोगोपदेशञ्च द्रौपद्येव करिष्यति ॥
व्रजतश्च त्वया वीर वीरौ वैष्णवसत्तमौ ।
न द्रौपदी न वीराश्च तत्र तिष्ठन्ति साम्प्रतम् ॥
गच्छ शीघ्रं निजगृहं यत्र ते द्रौपदी स्थिता ।
नासीत् सा द्रौपदी देवी या त्वया चावलोकिता ॥
शक्तिरासीन्मूलरूपा याद्या देवी प्रकीर्त्तिता ।
हन्तुमाज्ञां ददौ या च भ्रम एव न संशयः ॥
श्रुत्वा कृष्णस्य यद्वाक्यम्भययुक्तो बभूव ह ।
गच्छन् मार्गे भीमसेनो वीरौ मुशलधारिणौ ॥
ददर्श पुरतो यान्तौ भागयोर्वामदक्षयोः ।
जगाम निर्भयस्तत्र यत्र मायां ददर्श सः ॥
भवनं नैव वीराश्च तत्र तिष्ठन्ति साम्प्रतम् ।
वटवृक्षोऽयमेवास्ति कूपोऽयं नात्र संशयः ॥
क्व गताश्चैव ते वीराः क्व गता द्रुपदात्मजा ।
इति चिन्ताकुलो भीमो द्रुतं स्वभवनं ययौ ॥
ददर्श भीममायान्तं शीघ्रं सा द्रुपदात्मजा ।
जलं नीत्वा ययावग्रे हर्षिता सा च सुव्रता ॥
पादप्रच्छालनं कर्त्तुं मनश्चक्रे मनस्विनी ।
पुरा भयेन चोद्विग्नस्सैवेयमिति चिन्तयन् ॥
पश्चाद्धाव भीमस्तु एषा पास्यति शोणितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पातिव्रत्यस्य माहात्म्यात् सर्वं ज्ञातवती च सा ॥
उवाच वचनं साध्वी भयन्त्यज च हे प्रिय ।
स्वामिन् मां त्वं विजानासि मानुषीं द्रुपदात्मजाम् ॥
पश्य मे रूपमतुलं कालीरूपं मनोहरम् ।
इत्युक्त्वा ववृधे साध्वी श्यामा पर्वतकोपमा ॥
महाभयंकरी घोरजिह्वाललनभीषणा ।
चतुर्भुजा खड्गहस्ता मुण्डहस्ता तथैव च ॥
अभयञ्च वरञ्चैव हस्ताभ्यां दधती शिवा ।
यथा कज्जलमेरुस्स्यात्तथा तस्याश्शरीरकम् ॥
तुष्टाव भयसंविग्नमानसो भीमसेनकः ।
त्यजैनं देहकं देवि परमं विस्मयप्रदम् ॥
ततो बभौ द्रौपदी सा क्षणार्द्धेनैव सुव्रता ।
कालीरूपं जहौ तूर्णं द्रौपदी समजायत ॥
प्रोवाच सा भीमसेनं मोहं त्यज महामते ।
आत्मरूपाञ्च मां विद्धि शरीरं शवमेव च ॥
चित्तं वृत्तिर्द्विधा प्रोक्ता एका कार्य्यगता शुभा ।
अन्या च गुरुपादस्था तपोलोकगता पुनः ॥
या च लोकगता वृत्तिस्तया कार्यं करोति च ।
अर्द्धमात्रागता वृत्तिस्तया मुक्तिश्च लभ्यते ॥
लौकिकेनैव कार्य्येण परवृत्तिर्न बाध्यते ।
यथा नटी च वंशस्था जल्पन्ती च पुनः पुनः ॥
वक्ति वृत्या चैकया तु एकया वंशमाश्रिता ।
यथा मणीश्वरस्सर्प्पो मणिन्धृत्वा चरत्यपि ॥
भक्षणे च मणौ चापि वृत्तिद्वयमथेरितम् ।
यथैकं घटमास्थाय मस्तके कटिसन्निधौ ॥
द्वितीयञ्च तृतीयञ्च हस्ते लघुघटन्तथा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पानीयहारिणी कान्ता कलहं कुर्वती पथि ॥
वृत्तिद्वयमथाश्रित्य निश्शङ्कम्परिगच्छति ।
तथैव चैकया वृत्या ललाटे संस्थिताश्च माम् ॥
कालीरूपां विजानीहि चान्यया द्रुपदात्मजाम् ।
पत्नीरूपां विजानीहि यूयम्पञ्च शिवाः स्मृताः ॥
मयाभिलषितं स्वामिन् दृष्ट्वा च मुखपङ्कजम् ।
पञ्चकं स्वामिनो देव शरीरपञ्चकं कुरु ॥
विभज्य पञ्चधात्मानं कुन्तीपुत्रत्वमाप्तवान् ।
अहञ्च द्रौपदीनाम्नी पुत्री जाता नृपस्य च ॥
अग्निकुण्डात् समुद्भूता यूयञ्च पतयो मम ।
यत् कर्त्तव्यन्त्वदीयं हि सर्वं कुरु न शंकितः ॥
ध्यातव्यमात्मनो रूपं कालीरूपं ललाटगम् ।
ज्योतिस्स्वरूपं भो स्वामिन् शक्तिरित्येव घोष्यते ॥
सूक्ष्मात् सूक्ष्मतमन्तेजो महायोनिरिति स्मृतम् ।
यामर्धमात्रां ध्यायन्ति विष्णुब्रह्ममहेश्वराः ॥
राजयोगोऽयमाख्यातो भक्तानां मोददायकः ।
एवं श्रुत्वा भीमसेनो भ्रमयुक्तो बभूव ह ॥
तदैव ज्ञानमुत्पन्नन्तेजोरूपं जगत् स्मृतम् ।
तेजोरूपो भवेदात्मा तेजोरूपा मनस्विनी ॥
एतज्ज्ञानमुपादाय भीमस्स्वभवनं ययौ ।
निराधिर्गतसन्देहो द्रौपदीमात्मरूपिणीम् ॥
विज्ञाय जीवन्मुक्तोऽसौ विचचार महीतले ।" इति ।

तथा च सर्वं खल्विदम्ब्रह्मेति वेदवाक्यमपि संगतम्, अन्यथा जीवात्मपरमात्मभेदे व्यापकत्वमात्मनि न सिद्ध्येत्तथा च सर्वमित्येतत् पदमसंगतमेव स्यात् । अत एव वेदान्ततत्त्वबोधे ब्रह्मवेदं जगत् सर्वं ब्रह्मणोऽन्यन्न विद्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मान्यद्धाति चेन्मिथ्या यथा मरुमरीचिकेति। अतः परमत्रैतद्विचार्य्यते सूर्य्यो यथा चन्द्रामृतम्पीत्वा जगदुत्पादयति तथैव शक्त्यभिन्नरसूर्य्यः पुरुषचन्द्रशुक्लामृतं धृत्वा प्रजामुत्पादयति। अथ यथैवाग्नेः प्रधान स्थानं सूर्य्यमण्डलन्तथैव शक्तिरपि प्रधानमेव स्थानमिति निर्णीयते, अत एव श्मशानं द्विविधं देवि चिता योनिर्म्महेश्वरीति सर्वतन्त्रे लिखितमस्ति एवञ्च श्मशानयोनिकृष्णसूर्य्यमहाकालीदेवतानान्तेजोरूपत्वेनाभेदः पर्य्यवसितः, अत एव न मानुर्दैवतम्परमिति धर्मशास्त्राणामुक्तिरपि संगता, अत एव दक्षकृतधर्म्मशास्त्रे—जपे होमे तथा दाने स्वाध्याये देवताऽर्च्चने। नासौ फलमवाप्नोति युक्तो यः स्त्रीविहीनक इत्युक्तम्। अत एव देवतानां नमस्कारः पितॄणाञ्चोदकक्रियाः। दारतस्सम्प्रवर्त्तन्ते दारास्स्वर्गस्य साधनमिति वशिष्ठेनाप्युक्तम्। किञ्च यावन्न विन्दते जायान्तावदर्द्धो भवेत् पुमानिति व्यासेनाप्युक्तम्। अत एव स्त्रीणां निन्दाम्प्रहारश्च कौटिल्यञ्चाप्रियं वचः। आत्मनो हितमन्विच्छन् कालीभक्तो विवर्ज्जयेदिति मन्त्रमहोदधावुक्तम्। अत एव ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे स्वपत्नीम्पूजयेद्यो हि वस्त्रालंकारचन्दनैः। प्रकृतिस्तस्य सन्तुष्टा यथा कृष्णे द्विजाऽर्च्चने इत्युक्तम्। अत एव विद्यास्समस्तास्तव देवि भेदास्त्रियस्समस्तास्सकला जगत्स्विति सप्तशतीस्तोत्रे, अत एव नानानिबन्धे अष्टचत्वारिंशद्वत्सरवयो यावत् प्रपूर्य्यते। पुत्रभार्य्याविहीनस्य नास्ति यज्ञाधिकारिता॥ किञ्च—चत्वारिंशद्वत्सराणामष्टानाञ्च परे यदि। स्त्रिया विरहितः कश्चित्स तु रण्डाश्रमी भवेदिति व्यासबृहस्पतिवचनेऽवलोक्यते, अत एवाश्वमेधयज्ञप्रसरे स्वर्णनिर्म्मितसीता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शरीरे प्राणप्रतिष्ठां विधाय भगवता रामचन्द्रेण यज्ञसम्पत्तिः कृतेति लोके सुप्रसिद्धमस्ति, व्यलेखि च कात्यायनेन मुनिना छन्दोगपरिशिष्टे—रामोपि कृत्वा सौवर्णीं सीताम्पत्नीं यशस्विनीम्। इजे यज्ञैर्बहुविधैस्सह भ्रातृभिरच्युत इति। अत एव पत्नीं विना यज्ञकरणाधिकारो नास्ति दम्पत्योस्सहाधिकारात्।

बिन्दूतीतश्च बिन्दुश्च नादातीतश्च वेद यः।
नादे लीनं मना यस्य लूटनो द्विर्न भाषते॥
शक्तेरेवागतो यस्मात्तस्माच्छक्तिरहं स्मृतः।
शक्तावेव च गन्तास्मि कर्तव्यश्चाग्निहोत्रकम्॥
इत्युत्तरं मया लब्धं विचार्य च पुनः पुनः॥

इति समाप्ता भागीरथी व्याख्या।

चन्द्रेश्वरप्रसादाख्ये वसुधाधिपसत्तमे।
प्राणाधारे पण्डितानां धार्मिके च पुरस्सरे॥
अद्वैतशक्तिचरणे भक्तिर्य्यस्य सुनिश्चला।
गुणाकरे महोदारे व्याख्या सैषार्प्पिता मया॥

संशोधिता चेयम्पण्डितकुलपतिना महामहोपाध्यायश्रीलालजीशर्म्मणा, वैयाकरणगुरुणा म० म० श्रीराजिनाथशर्मणा च।

खण्डवलाकुलावतंसेन बी.ए. इत्युपाधिधारिणा मधुवनीपतिश्री ५ क्षेमधारिसिंहप्रभुवरेण कृतामाज्ञां विनिधाय प्रकाशितेयं 'मुखतार' इत्युपाधिधारिणा श्रोत्रियपदाङ्कितेन श्रीसतञ्जीवशर्मणा पण्डितहितैषिणा।

यथार्थनामधेया व्याख्येयमिति—गंगाधरशास्त्री।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नगवास-ग्रामनिवासिप्रियपण्डित-श्रीअनूपमिश्रस्य तथा यमसमवास्तव्यचातुर्धरिकपण्डितश्रीसत्यदेवशर्म-कृतेधन्यवादं वितरति, यदतुलपरिश्रमतः पुस्तकस्यैतस्यै प्रकाशने महानुपकारो जात इति ।

समर्पणम्—

मिथिलामण्डलान्तर्गतोद्यान-(उजान) ग्रामवास्तव्य-'मुखतार'-बाबूश्रीसतजीवशर्ममहानुभावनिकटे बहुमानपुरस्सरमिदम्पुस्तकं प्रकाशनाय समर्प्यते ।

श्रीलूटनशर्मा ।

पुस्तकप्राप्तिस्थाने—

पं० श्रीश्रीदत्तझा
तारामन्दिर,
नेपालीखपड़ा, बनारस ।

पं० श्रीश्यामादत्तझा
मु०क लघ
पो. लोहट, जि०दरभङ्गा।

Kirtikant Sharma Collection, Najafgarh